# Shri Ambikastavanam

# શ્રીઅમ્બિકાસ્તવનમ્

## Document Information

Text title : ambikAstavanam

File name : ambikAstavanam.itx

Category : devii, devI, jaina, stava

Location : doc_devii

Author : Vastupala

Proofread by : DPD

Latest update : March 30, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીઅમ્બિકાસ્તવનમ્

મહામાત્યશ્રીવસ્તુપાલવિરચિતં

પુણ્યે ગિરીશશિરસિ પ્રથિતાવતારામાસૂત્રિતત્રિતજગતીદુરિનાપહારામ્ ।
દૌર્ગત્યપાતિજનતાજનિતાવલમ્વામમ્વામહં મહિમહૈમવતીં ! મહેયમ્ ॥ ૧॥

યદ્વક્ત્રકુઞ્જરહરોદ્ગતસિંહનાદોऽપ્યુન્માદિવિઘ્નકરિયૂથકધામમાથમ્ ।
કૃऽષ્માણ્ડિ ખણ્ડયતુ દુર્વિનયેન કણ્ઠઃ કણ્ઠીરવઃ સ
તવ ભક્તિનતેષુ ભીતિમ્ ॥ ૨॥

કૃષ્માણ્ડિ ! મણ્ડનમભૂત્તવ પાદપદ્મયુગ્મં યદીયહૃદયાવનિમણ્ડલસ્ય ।
પદ્માલયા નવનિવાસવિશેપલાભલુબ્ધા ન ધાવતિ કુતોऽપિ તતઃ પરેણ ॥ ૩॥

દારિદ્ર્યદુર્દમતમઃશમનપ્રદીપાઃ સન્તાનકાનનઘનાઘનવારિધારાઃ ।
દુઃખોપતપ્તજનબાલમૃણાલદણ્ડાઃ કૃષ્માણ્ડિ ! પાતુ પદપદ્મનસ્વાંશવસ્તે ॥ ૪॥

દેવિ ! પ્રકાશયતિ સન્તતમેષ કામં વામેતરસ્તવ કરશ્ચરણાનતાનામ્ ।
કુર્વન્ પુરઃ પ્રગુણિતાં સહકારલુમ્બિમમ્બે ! વિલમ્બવિકલસ્ય ફલસ્ય લાભમ્ ॥ ૫॥

હન્તું જનસ્ય દુરિતાં ત્વરિતા ત્વમેવ નિન્ચે ત્વમેવ જિનશાસનરક્ષણાય ।
દેવિ ! ત્વમેવ પુરુષોત્તમમાનનીયા કામં વિભાસિ વિભયા સભયા ત્વમેવ ॥ ૬॥

તેષાં મૃગેશ્વરગરજ્વરમારિવૈરિદુર્વાર્વારણજલજ્વલનોદ્ભવા ભીઃ ।
ઉચ્છુરઙ્ખલં ન ખલુ ખેલતિ યેષુ ધત્સે
વાત્સલ્યપલ્લવિતમમ્બકમમ્બિકે ! ત્વમ્ ॥ ૭॥

દેવિ ! ત્વદૂર્જિતજિતપ્રતિપન્થિતીર્થયાત્રાવિધૌ બુધજનાનનરઙ્ગસઙ્ગિ ।
એતત્વયિ સ્તુતિનિભાદ્ભુતકલ્પવલ્લીહલ્લીસકં સકલસઙ્ઘમનોમુદેऽસ્તુ ॥ ૮॥

વરદે ! કલ્પવલ્લિ ! ત્વં સ્તુતિરૂપે ! સરસ્વતિ !।
પાદાગ્રાનુગતં ભક્તં લમ્ભયસ્વાતુલૈઃ ફલૈઃ ॥ ૯॥

સ્તોત્રં શ્રોત્રરસાયનં શ્રુતસરસ્વાનમ્બિકાયાઃ પુર-

શ્રક્રે ગૂર્જરચક્રવર્તિસચિવઃ શ્રીવસ્તુપાલઃ કવિઃ ।
પ્રાપ્તઃ પ્રાતરધીયમાનમનઘં યચ્ચિત્તવૃત્તિં સતા-
માધત્તે વિભુતાં ચ તાણ્ડવયતિ શ્રેયઃશ્રિયં પુષ્યતિ ॥ ૧૦॥

ઇતિ મહામાત્યશ્રીવસ્તુપાલવિરચિતા અમ્બિકાસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by DPD

*Shri Ambikastavanam*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*